# 7.2.1 SUPPORTING DOC
## Sanskrit Sambhasan Varg





# Sanskrit Sambhasan Shibir



## संस्कृतसम्भाषणशिबिरम्-२०१५



श्रीसोमनाथसंस्कृतविश्वविद्यालये ऐषमे शैक्षिकवर्षे नूतनप्रविष्टानां छात्राणां कृते संस्कृतसम्भाषणकौशलवर्धनाय जुलैमासे एकमासात्मकं संस्कृतसम्भाषणशिबिरम् आयोजितम्। शिबिरस्य आरम्भः जुलैमासस्य षष्ठ दिनाङ्के दर्शनसङ्कायस्य अधिष्ठात्रा डॉ.जानकीशरणेन कृतम्। अस्मिन् शिबिरे पञ्चाशत् छात्राः भागमगृह्णन्। प्रतिदिनं संस्कृतसम्भाषणेन सह प्रात्यक्षिकम्, लघुनाटकम्, संस्कृतगीतम्, संस्कृतहास्यकणिका, संस्कृतक्रीडादिभिः संस्कृतसम्भाषणस्य अभ्यासः कारितः।

एकमासात्मकस्य अस्य संस्कृतसम्भाषणशिबिरस्य



समारोपसमारोहः स्वस्तिश्रीमन्मथ-आषाढकृष्ण-एकादशी-सोमवासरे १०-०८-२०१५ तमे दिनाङ्के अपराह्णे पञ्चवादने प्रभासज्योतिः इति शैक्षिकभवनस्य मुख्यसभागारकक्षे प्रावर्तत। समारोहेऽस्मिन् सारस्वतातिथिरूपेण श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. अर्कनाथचौधरीमहाभागः, अध्यक्षरूपेण कार्यकारी कुलसचिवः डॉ. दशरथजादवः, विशिष्टातिथिरूपेण अनुस्नातकभवनस्य अध्यक्षः प्रो. देवेन्द्रनाथपाण्डेयः, प्राचार्यः डॉ. नरेन्द्रपण्ड्या च आसीत् । कार्यक्रमस्य आरम्भः वैदिक्या प्रार्थनया लौकिकमङ्गलाचरणेन सह दीपप्राकट्यपूर्वकम् अभवत् । कार्यक्रमस्य संयोजकेन डॉ.जानकीशरणेन अतिथिनां पुष्पस्तबकेन सह सर्वेषां स्वागतं कृतम्।

समारोपसमारोहममुम् उपलक्ष्य मान्यः कुलपतिश्री प्रो. अर्कनाथचौधरीमहाभागः छात्रेभ्यः सारस्वतभाषणं विदधत। महोदयेन भणितं यत् देवभाषा संस्कृतम् अद्भुतं वर्तते । अस्यां भाषायां नूतनशब्दानां सृजनस्य शक्तिर्विद्यते । अतः इयं भाषा अद्यापि सर्वभाषाणां मातृभाषारूपेण आद्रियते । संस्कृतवाङ्मये प्रवेशाय, संस्कृतभाषावबोधनाय संस्कृतसम्भाषणम् आरम्भिकं सोपानं वर्तते। अतः प्रतिवर्षम् एतादृशं शिबिरम् आयोजनीयम् । स्वकीये आध्यक्षीये उद्बोधने कार्यकारिकुलसचिवेन डॉ. दशरथजादवमहोदयेन शिबिरेऽस्मिन् भागगृहीतॄणां छात्राणां कृते अभिनन्दवचांसि भणितानि । महोदयेन उक्तं यत् संस्कृतेतरमाध्यमेन स्नातकपरीक्षाम् उत्तीर्य अस्मिन् शिबिरे एकमासात्मकं संस्कृतसम्भाषणप्रशिक्षणं सम्प्राप्य संस्कृतमाध्यमेन सम्भाषणं



कर्तुं शक्नुवन्तीति अस्माकं कृते प्रत्यक्षं वर्तते । अतः संस्कृतं प्रति च्छात्राणामुत्साहवर्धनाय एतादृशं शिबिरमायोजनीयम् । अस्मिन् समारोहे रजनीक-प्रफुल्ल-आकाशपुरोहित-मयूरजानी-पायलचावडा-वैशालीमैयड इत्यादिभिः छात्रैः संस्कृतनाटकगीतादिकं प्रस्तुतम्।

अस्मिन् संस्कृतसम्भाषणशिबिरे मुख्यशिक्षकत्वेन दर्शनविभागस्य प्राध्यापकः डॉ.जानकीशरणः आसीत् । सहशिक्षकत्वेन मयूरजानी, आकाशपुरोहितः, अरुणपाण्डेयः, जोषी मेहुलः इत्याद्याः छात्राः आसन् । कार्यक्रमस्यान्ते संयोजकेन डॉ. जानकीशरणेन समेषां धन्यवादः विहितः ।



Report Source: **SOMJYOTI**- University Newsletter

# Setu Pathyakram

श्री सोमनाथ संस्कृत विश्वविद्यालय , वेरावल द्वारा इस वर्ष शास्त्री तथा आचार्य में प्रवेश करने वाले छात्रों के लिए दिनांक १७/०७/२०२० से "Online संस्कृत संभाषण वर्ग" का सफलतापूर्वक आरंभ किया गया है।

नूतन प्रविष्ट छात्रों को सरल संस्कृत संभाषण से शास्त्र के प्रति प्रेरित करने में इस वर्ग की भूमिका महत्वपूर्ण होती है।

इस वर्ग का संचालन डॉ. दीपेश कतिरा तथा श्री जिगर भट्ट कर रहे हैं।





श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
॥ नव-प्रविष्टच्छात्राणां कृते मासव्यापी संस्कृत-सम्भाषण-वर्गः ॥
(१७.०७.२०२० तः २०.०८.२०२०)
समापन-कार्यक्रमः
दिनाङ्कः – २०.०८.२०२० समयः – ०४.०० तः ०५:००
विशेषोपस्थितिः
प्रो. गोपबन्धु-मिश्रः
(कुलपतिः, श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्)
संयोजकौ
डॉ. दीपेश विनोद कतिरा
श्रीजिगर भट्ट
आमन्त्रकः
(कुलसचिवः)
प्रि. नरेन्द्रकुमार पण्ड्या
(प्राचार्यः)




Gopabandhu Mishra
Rutwik
R
VV




Dhruv Purohit
Rutwik
R
VV

# Vagvardhini Competition

## वाग्वर्धिनीपरिषत्-२०१६-१७

श्रीसोमनाथसंस्कृतविश्वविद्यालये शास्त्राध्ययनेन सह छात्राणां प्रतिभाविकासाय विभिन्नाः प्रकल्पाः अनुष्ठीयन्ते । तस्मिन्नेव क्रमे छात्राणां वाक्कौशलवर्धनाय शास्त्रज्ञानवर्धनाय च वाग्वर्धिनीपरिषदः आयोजनं प्रतिगुरुवासरं क्रियते । अस्यां सभायां छात्रा स्वस्वशास्त्रेषु संस्कृतमाध्यमेन भाषणं कुर्वन्ति । प्रेरकाः अध्यापकाः अपि सभायामस्यां समुपस्थाय छात्राणामुत्साहवर्धनं कुर्वन्ति । सर्वेषु अधिवेशनेषु सर्वाधिकरूपेण भाषणकर्तॄणां छात्राणां कृते वाग्वर्धिनी-परिषत्समारोपसमारोहे पुरस्काराः प्रदीयन्ते । अस्मिन् हायने अस्याः वाग्वर्धिनीपरिषदः त्रयोदश- अधिवेशनानि सम्पन्नानि । ०१-०४-२०१७ तमे दिनाङ्के वार्षिकोत्सवे सर्वाधिकरूपेण भाषणकर्तारः छात्राः माननीयकुलपतिना प्रो. अर्कनाथचौधरी-महोदयेन, कार्यकारिकुलसचिवेन डॉ. दशरथजादवमहोदयेन च पुरस्कारैः सभाजिताः आसन् । २०१६-१७ तमे शैक्षिकवर्षे अस्याः परिषदः अध्यक्षः डॉ. रमेशचन्द्रशुक्लः तथा सभ्यौ दर्शनसङ्कायाध्यक्षः डॉ. जानकीशरणः आचार्यः, श्रीउमाशङ्करझा च सफलतापूर्वकम् अस्याः सभायाः सञ्चालनम् अकुर्वन् ।

Report Source: **SOMJYOTI**- University Newsletter

अध्यापकाः छात्राश्च ।

## वाग्वर्धिनीपरिषत्-२०१५-१६



श्रीसोमनाथसंस्कृतविश्वविद्यालये प्रतिगुरुवारसरं छात्राणां वाक्कौशलवर्धनाय शास्त्रज्ञानवर्धनाय च वाग्वर्धिनीपरिषदः आयोजनं क्रियते । अस्यां सभायां छात्रा स्वस्वशास्त्रेषु संस्कृतमाध्यमेन भाषणं कुर्वन्ति । अध्यापकाः अपि सभायामस्यां समुपस्थाय छात्राणाम् उत्साहवर्धनं कुर्वन्ति। सर्वासु सभासु सर्वाधिकरूपेण भाषणकर्तॄणां छात्राणां कृते वाग्वर्धिनीपरिषत्समारोपसमारोहे पुरस्काराः प्रदीयन्ते । अस्मिन् हायनेऽपि वार्षिकोत्सवे सर्वाधिकरूपेण भाषणकर्तारः छात्राः माननीयकुलपतिना श्रीअर्कनाथचौधरीमहोदयेन, कुलसचिवेन श्रीदशरथजादवमहोदयेन च पुरस्कारैः सभाजिताः आसन् । २०१५-१६ तमे शैक्षिकवर्षे अस्याः परिषदः अध्यक्षः डॉ. रमेशचन्द्रशुक्लः तथा सभ्यौ डॉ. जानकीशरणः, श्रीउमाशङ्करझा च सफलतापूर्वकम् अस्याः सभायाः सञ्चालनम् अकुर्वन्।

Report Source: **SOMJYOTI**- University Newsletter

# Vaakyartha Parishad

## वाक्यार्थपरिषद्व्याख्यानमाला २०१६-२०१७

वाक्यार्थपरिषद् २०१६-१७ सत्रस्य व्याख्यानमाला दिनाङ्क ०२-०६-२०१६ तः २-०६-२०१७ वर्षैकपर्यन्तं प्रचालितवन्तः। अस्मिन् वर्षे सप्ताधिवेशनानि जातानि तेषु प्रथमाधिवेशनं १५-०६-२०१६ दिनाङ्के अभवत्। अस्य सत्रस्य सत्राध्यक्षाः मुख्यवक्ता च माननीयकुलपतयः प्रो. अर्कनाथ-चौधरीमहाभागा आसन्। महोदयस्य विषयः **धात्वार्थविमर्शः** आसीत्। द्वितीयवक्तृरूपेण डॉ. दशरथजादवः कुलसचिवः, विषयः **विश्वविद्यालयस्य विकासे प्रशासनस्य भूमिका** तृतीयवक्तृरूपेण प्रो. विनोदकुमारझामहोदया आसन् विषयः **सूत्रार्थविमर्शः** आसीत्।

द्वितीयाधिवेशनं ०६-०१-२०१७ दिनाङ्के जाते अस्य सत्रस्य सत्राध्यक्षाः प्रो. विनोदकुमारझामहोदया आसन् वक्तृरूपेण प्रो. देवेन्द्रनाथ पाण्डेय, विषयः पाश्चात्त्यविदुषां संस्कृतानुरागः, डॉ. नरेन्द्रकुमार एल्. पण्ड्यामहोदयस्य विषयः **श्रीमद्भगवद्गीतानिभावितभावाः**, डॉ. महेन्द्रकुमार दवे महोदयानां विषयः **शान्तोऽपि नवमो रसः**।

अतः परं तृतीयाधिवेशनं २०-०१-२०१७ दिनाङ्के जातं अस्य सत्रस्य सत्राध्यक्षाः प्रो. देवन्द्रनाथपाण्डेयमहोदया आसन् वक्तृरूपेण डॉ. पङ्कजकुमाररावलः, विषयः **चातुर्वर्ण्यं मया सृष्टम्**, डॉ. डाह्यालाल मोकरिया, विषयः **मित्रस्य परिभाषा**, डॉ. अमृतलाल भोगायता, विषयः **रमणीयार्थप्रतिपादनम्** तथैव चतुर्थाधिवेशनं दिनाङ्क ३०-०१-२०१७ दिनाङ्के जातम् अस्य सत्रस्य सत्राध्यक्षाः प्रो. विनोदकुमारझामहोदयाः पुनः सत्राध्यक्षाः तथा वक्तृरूपेण प्रो. अर्चना दूबे विषयः **रसविमर्शः**, डॉ. जानकीशरणआचार्यः विषयः **संस्कृते संशोधनोपयोगिकोशग्रन्थाः** संगणकश्च, डॉ. दीपक कतिराः विषयः **आधुनिकभारतीयभाषासुदृढाः मूलतः संस्कृतभाषायाः वचोविच्छित्तयः** पञ्चमाधिवेशनं ०६-०२-२०१७ दिनाङ्के जातं सत्राध्यक्षाः डॉ. नरेन्द्रकुमार एल् पण्ड्या एवं वक्तृरूपेण डॉ. शत्रुघ्नपाणिग्राहीः विषयः **पूर्वयागस्य वैशिष्ट्यम**, डॉ. बी. उमामाहेश्वरीः विषयः **प्रत्यक्षप्रमाणस्य अभिनवालोचनम्**, प्राध्यापिका बारैया दृष्टिः विषयः "**અષ્ટાંગયોગમાં પ્રાણાયામ**" तथैव षष्ठाधिवेशनं १८-०२-२०१७ दिनाङ्के जातम्।

## वाक्यार्थपरिषद् २०१७-२०१८

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य परिसरे अध्यापकानां कृते छात्राणां लाभाय वाक्यार्थपरिषद आयोजनं भवति तथैव अस्मिन् वर्षे अपि १५-०९-२०१७ तमे दिनाङ्के अस्याः परिषद उद्घाटनमभवत्। सत्राध्यक्षाणां माननीयानां कुलपतिवर्याणाम् अर्कनाथचौधरी महाभागानां **प्रमाणमीमांसा** इत्यस्मिन् विषये व्याख्यानमभवत्।

Report Source: **SOMJYOTI**- University Newsletter

## वाक्यार्थपरिषद्- २०१६

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन प्रतिवर्षं स्वोत्कर्षाय शास्त्रसेवायै छात्रलाभाय च विविधेषु विषयेषु शास्त्रावगाहनं कर्तुं प्राध्यापकेभ्यः वाक्यार्थपरिषदाख्यः कार्यक्रमः प्रवर्त्यते । २०१५-२०१६ इत्यस्मिन् वर्षे डॉ. पङ्कजकुमार रावलः, डॉ. शत्रुघ्नपाणिग्राही अनयोः संयोजने अयं प्रकल्पः समनुष्ठितः । अस्यां परिषदि प्राध्यापकाः अध्यापनबिन्दून् अभ्यासक्रमं विहाय वा सर्वोपकारकं विषयं विचिन्वन्ति । तेन बहूनां शास्त्राणां विषयाणां संस्पर्शः भवति । विश्वविद्यालयेनानेन सत्रारम्भे कुलपतिवर्याणां प्रो. अर्कनाथचौधरिमहोदयानां व्याकरणविषयावगाहनरतानां वाक्यार्थपरिषदि लाभः गृहीतः । ततश्च क्रमेण सर्वैरपि प्राध्यापकैः व्याख्यानं कृतम् । अत्र सूची प्रदीयते ।

**प्रथमाधिवेशनम् - १७-१०-२०१५**

अध्यक्षः - प्रो. अर्कनाथचौधरीमहाभागा - विध्यादय अर्थाः द्योत्याः वाच्याः वा
मञ्चसञ्चालकः - डॉ. शत्रुघ्नपाणिग्राही

**द्वितीयाधिवेशनम् - १८-०१-२०१६**

अध्यक्षः - डॉ. नरेन्द्रकुमारपण्ड्या
मञ्चसञ्चालकः - डॉ. शत्रुघ्नपाणिग्राही
१. प्रो. देवेन्द्रनाथपाण्डेयः - वैदिकदेवशास्त्रम्
२. डॉ. दीपेशकतिरा - भावविकारविमर्शः
३. डॉ. जानकीशरणः - भारतीयदर्शनेषु
पाठसमालोचनपद्धतिः

**तृतीयाधिवेशनम् - १६-०२-२०१६**

अध्यक्षः - प्रो. देवेन्द्रनाथपाण्डेयः
मञ्चसञ्चालकः - डॉ. पङ्कजरावलः
१. प्रो. विनोदकुमारझा - नधातुलोपअर्धधातुके"इतिसूत्रार्थविचारः
२. डॉ.डायाभाई मोकरीया - संस्कृतसाहित्ये पित्रोः गौरवम्
३. डॉ. अमृतलालः भोगायता - अनन्योक्तेरन्योक्तेरीषदास्वादः

**चतुर्थाधिवेशनम् - २१-०३-२०१६**

अध्यक्षः - प्रो. विनोदकुमारझा
मञ्चसञ्चालकः - डॉ. शत्रुघ्नपाणिग्राही
१. डॉ. महेन्द्रकुमारः ए. दवे - रम्या रामायणी कथा
२. डॉ.ललितः पटेलः - ध्वनिः, ध्वनिप्रपञ्चः, तत्प्रयोजनञ्च
३. बी. उमामाहेश्वरी - व्याप्तिस्वरूपविचारः

**पञ्चमाधिवेशनम् - ०१-०४-२०१६**

अध्यक्षः - डॉ. नरेन्द्रकुमारपण्ड्या
मञ्चसञ्चालकः - डॉ. पङ्कजरावलः
१. डॉ. शत्रुघ्नपाणिग्राही - मन्त्रार्थविचारः
२. डॉ.रमेशचन्द्रशुक्लः - ज्योतिषशास्त्रे
नवविधकालमानविचारः
३. डॉ. कार्तिकः पण्ड्या - डॉ.गोस्वामीबलभद्रप्रसदशास्त्रीकृत 'इन्दिराजीवनम्' शतक काव्य का काव्यशास्त्रीय अध्ययन

**षष्ठाधिवेशनम् - ०५-०४-२०१६**

अध्यक्षः - डॉ. नरेन्द्रकुमारपण्ड्या
मञ्चसञ्चालकः - डॉ. शत्रुघ्नपाणिग्राही
१. डॉ. नरेन्द्रकुमारपण्ड्या - काव्यदोषविमर्शः
२ डॉ.पङ्कजकुमाररावलः - पाठ्यन्ते पशुभिर्नराः
३. रविन्द्रःएस्.काले - Copyrights in India : An Introduction
४. उमाशङ्करः झा - ग्रहाणां गतिविचारः

Report Source: **SOMJYOTI**- University Newsletter

# Spoken Sanskrit Skill Development Camp
# (27--11-19 to 01-12-19)



## श्रीसोमनाथसंस्कृतविश्वविद्यालये प्रवृत्तः चतुर्दिनात्मकः आवासीयः संस्कृतभाषानैपुण्यवर्गः

संस्कृताध्येतृच्छात्राणां कृते शास्त्राध्ययनेन समं संकृतभाषया निरर्गलतया शुद्धतया च सम्भाषणस्य अभ्यासः नितान्तम् आवश्यकः इति अस्मत्कुलपतिपादानामभिप्रायम् अनुसृत्य २०१९ तमस्य वर्षस्य नवेम्बरमासस्य २७ तमात् दिनात् डिसेम्बरमासस्य प्रथमदिनं यावत् श्रीसोमनाथसंस्कृतविश्वविद्यालये आवासीयः संस्कृतभाषानैपुण्यवर्गः समायोजितः। वर्गममुं सञ्चालयितुं कच्छजनपदात् श्रीधर्मेन्द्र मेमकिया महोदयः, जामनगरात कुमारी कोमल भट्ट महोदया, भावनगरात् श्रीप्रणव राज्यगुरु महोदयः, गांधिनगरतः श्रीजय पाढ महोदयः, अहमदाबादतः श्रीचिराग महेता महोदयः, वडोदरानगराच्च डॉ. योगेश त्रिवेदी महोदयः तज्ज्ञत्वेन आहूताः आसन्। एभिः समं अस्मद्विश्वविद्यालयस्य प्राध्यापकाः डॉ. पङ्कज रावल महोदयः, डॉ. दीपेश विनोद कतिरा, श्रीमेहुल जोषी महोदयः, श्रीजिगर भट्ट महोदयः च वर्गसञ्चालने सहकृतवन्तौ।







विश्वविद्यालयस्य वरीयांसः छात्राः श्रीरवि रादडिया, कुमारी मिरल व्यास, कुमारी कीर्ति शर्मा, श्रीनील दवे, कुमारी पूनम भजगोतर, श्रीहर्षित त्रिवेदी चापि वर्गसंचालने सहकृतवन्तः। वर्गस्यास्य उद्घाटने संस्कृतभारत्याः पश्चिमक्षेत्रसंघटनमन्त्री श्रीहिमाञ्जय पालिवाल महोदयः, विश्वविद्यालयस्य कुलपतयः कुलसचिवाश्च समुपस्थाय वर्गस्य सफलनिर्वहणाय आशीर्वचांसि प्राददुः। संस्कृतं काचित् भाषा। भाषायाः अधिगमः अध्यापनेन समं तत्तद्भाषायाः वातावरणनिर्मित्या भवति इति तत्त्वमनुसृत्य प्रत्यहं प्रातः ६वादनात् रात्रौ १०वादनं यावत् विविधाः कालांशाः आयोजिताः आसन्।

अस्मिन् कालावधौ कदाचित् प्रत्यक्षपाठनेन कदाचित् गणकार्यद्वारा कदाचिच्च क्रीडा-प्रतिभाप्रदर्शनादिभिश्च छात्राः संस्कृतेन व्यवहर्तुं प्रेरिताः। वर्गस्य समापने विश्वविद्यालयसंलग्नमहाविद्यालयस्य प्राचार्याः प्रि. नरेन्द्रकुमार पण्ड्या महाभागाः समुपस्थाय छात्रान् उदबोधयन्। वर्गेऽस्मिन् विश्वविद्यालस्य ११६ छात्राः सहभागम् समूह्य नित्यजीवने संस्कृतेन व्यवहारं कर्तुं प्रेरणां प्राप्नुवन्।

Report Source: **SOMJYOTI**- University Newsletter

# Workshops



## ब्रह्मसूत्रस्वामिनारायणभाष्यश्लाका – कार्यशाला

BAPS स्वामिनारायण संशोधनकेन्द्रस्य तथा च श्रीसोमनाथसंस्कृतविश्वविद्यालस्य संयुक्ततत्त्वावधानेन एका दिनत्रयव्यापिनी कार्यशाला BAPS स्वामिनारायणसंस्कृतमहाविद्यालये ०८-०९-२०१७ तः१०-०९-२०१७ पर्यन्तम् आयोजिता। अस्यां कार्यशालायां विश्वविद्यालय सम्बद्ध-महाविद्यालयेभ्यः सप्तत्यधिकाः छात्राः भागमग्रृह्णन्। प्रथमे दिवसे कार्यशालासंयोजकेन श्रीगजेन्द्रपण्डामहोदयेन प्रास्ताविकं व्याख्यानं प्रदत्तम्। ततः साधुश्रुतिप्रकाशदासमहोदयेन जिज्ञासाधिकरणस्य पाङ्क्तमध्ययनम् अकार्षीत् । अस्यां कार्यशालायाम् दुतेषामपि विदुषां व्याख्यानानि समज़ायन्त । यथा डॉ. जानकीशरण आचार्यस्य अर्थविबोधेन सहः कण्ठपाठः तथा बी. उमामाहेश्वरी महोदयायाः भारतीयदर्शनेषु वेदान्तदर्शनम् ब्रह्मसूत्राणां महत्त्वञ्च इति विषये व्याख्यानम् अभवत्। कार्यशालायाः अन्तिमे दिवसे पूज्य स्वयम्प्रकाशस्वामिभिः सर्वेभ्यः आशीर्वादाः व्याहृताः। कार्यशालायाः अन्ते कार्यशालासंयोजकेन डॉ. जानकीशरण आचार्येण सर्वेषां कृते धन्यवादज्ञापनं कृतम्। अस्याः कार्यशालायाः संपूर्ण विवरण डॉ. जानकीशरण आचार्यस्य सविधे वर्तते।



## राज्यस्तरीयस्पर्धा

**२३ दिसम्बर २०१७ तमे दिनाङ्के स्पर्धाअनिरूद्धाचार्य सं.म.विद्याालये राज्यस्तरीया शास्त्रीयस्पर्धा अभवत्। तत्र सफलाः इमे छात्राः।**

१. अरुणपाण्डेयः – प्रथमं स्थानं (Quiz स्पर्धा)
२. राहुल झा – प्रथमं स्थानं (Quiz स्पर्धा)
३. अरुण पाण्डेय – प्रथमं स्थानं (समस्यापूर्तिस्पर्धा)
४. जयंपाढः – तृतीयं स्थानं – व्याकरणभाषणम्
५. राहुल झा – तृतीयं स्थानं – मीमांसाभाषणम्
६. अरुण पाण्डेय – तृतीयं स्थानं – न्यायभाषणम्
७. प्रकाश मिश्रः– तृतीयं स्थानं – वेदभाष्यभाषणम्
८. राजा जानी – तृतीयं स्थानं – जैनबौद्धभाषणम्
९. बालासरा रोहित – तृतीयं स्थानं– साहित्यभाषणम्

## अखिलभारतीयशास्त्रीयस्फूर्ति स्पर्धा

अखिलभारतीयशास्त्रीयस्फूर्ति स्पर्धा में गुजरात से श्रीसोमनाथ संस्कृत युनिवर्सिटी के दो छात्र राहुल कुमार झा और अरुण कुमार पांडेय को प्रथम क्रमाङ्क प्राप्त हुआ।

Report Source: **SOMJYOTI**- University Newsletter

## ब्रह्मर्षिधाम्नि समायोजिता पुराणेतिहासधर्मशास्त्रानुसन्धानकार्यशाला

वेरावलस्थ-श्रीसोमनाथसंस्कृतविश्वविद्यालयः किञ्च नडियादस्थ-ब्रह्मर्षिसंस्कृतमहाविद्यालयः इत्यनयोः संयुक्तसहकारेण २६.०९.२०१८ दिनाङ्कतः २८.०९.२०१८ पर्यन्तं ब्रह्मर्षिसंस्कार-धामपरिसरे विश्वविद्यालयस्य पुराणसङ्कायेन पुराणेतिधर्मशास्त्रानुसन्धानकार्यशाला समायोजि। एतस्याः संस्थायाः प्रमुखविश्वस्तैः पद्मश्रीडाह्याभाईशास्त्रिमहोदयैः, श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिचरणैः आचार्यैः गोपबन्धुमिश्रमहोदयैः प्रधानाचार्यचरैः डॉ. कृष्णप्रसादनिरौलामहोदयैः च स्वीयगरिममयोपस्थित्या कार्यशालेयं साफल्यं प्रापिता। वाल्मीकीयरामायणम् अधिकृत्य विविध-विद्वद्भिरस्यां कार्यशालायां सरसव्याख्यानानि अदियन्त।

साधुः श्रुतिप्रकाशदासः, डॉ. वसन्तकुमारभट्टः, डॉ. वसन्तभाईपरिखः, डॉ. नरेन्द्रकुमार पण्ड्या, डॉ. पङ्कजकुमाररावल, डॉ. शान्तिकुमारपण्ड्या, श्रीजितेन्द्रकुमारव्यास, श्रीभद्रेशभाईव्यासः, डॉ. अमृतलाल भोगायता तथा च अन्ये विद्वांसः इमां कार्यशालां शास्त्रगर्भितैः स्वव्याख्यानैः व्यभूषयन्। विविधमहाविद्यालयेभ्यः प्राध्यापकाः अपि अत्र भागमगृह्णन् किञ्च छात्रैः अपि व्याख्यानश्रवणमक्रियत।



कार्यशालायाः उद्घाटनस्य कानिचन दृश्यानि









Report Source: **SOMJYOTI**- University Newsletter



## ब्रह्मर्षिधाम्नि आयोजिता व्याकरणशास्त्रकार्यशाला



श्रीसोमनाथसंस्कृतविश्वविद्यालयेन १८ तः ३०.१२.२०१८ पर्यन्तं श्रीब्रह्मर्षिसंस्कृतमहाविद्यालये "धातूद्देश्यकाः प्रत्ययाः" इति विषयमाश्रित्य अभिनवा एका व्याकरणकार्याशाला समायोजिता आसीत्। अस्यां विविधमहाविद्यालयेभ्यः प्रायः ६२ विद्यार्थिनः अध्ययनाय समागताः। डॉ. पुष्पादीक्षितमहोदयया स्वीयया विशिष्ट्या शैल्या धातूद्देश्यकाः प्रत्ययाः इति विषये नितरामध्यापनकर्म अक्रियत। उद्घाटनसत्रे ब्रह्मर्षिसंस्कृतमहाविद्यालय-नडियादप्रमुखाः पूज्याः पद्मश्रीडाह्याभाई शास्त्रिणः, श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य कुलपतिवर्याः आचार्याः गोपबन्धुमिश्रमहाभागाः, ब्रह्मर्षिसंस्कृतमहाविद्यालयस्य प्राचार्यचराः डॉ. कुष्णप्रसादनिरौलाः, प्रो. वसन्तकुमारभट्टाश्च उपस्थिताः भूत्वा प्रासङ्गिकोद्बोधनम् अकार्षुः। प्रो. विनोदकुमार झा अस्याः कार्याशालायाः प्रमुखसंयोजकः, डॉ. दिपेशकतिरा च संयोजकः आस्ताम्। स्थानीयसंयोजकरूपेण श्रीब्रह्मर्षिसंस्कृतमहाविद्यालयस्य प्राचार्यः डॉ. अमृतलाल भोगायता तथा च स्थानीयसहसंयोजकः डॉ. क्षितीश्वरनाथपाण्डेयः अविद्यत।



Report Source: **SOMJYOTI**- University Newsletter

## डिप्लोमापाठ्यक्रमप्रवेशविषये एकदिवसीयकार्यशाला




कार्यशालायाम् उपस्थितान् सम्बोधयन् परीक्षानियामक: डॉ योगेशपटेल

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य परिसरे ०८-०८-२०१९ दिनाङ्के विश्वविद्यालयसंलग्नेषु पञ्चत्रिंशत् पदविकाभ्यासक्रमक्रेन्द्रेषु सञ्चालितानां विविधपदविकाभ्यासक्रमाणाम् २०१९-२० शैक्षणिकवर्षात् अधितन्त्रिप्रवेश-प्रक्रियां कर्तुम् एकदिवसीया कार्यशाला समायोजिता। कार्यशालाया: आरम्भे कुलपति: प्रो. गोपबन्धुमिश्र: संस्कृतभाषाया: विकासार्थं किञ्च गुणवत्तायुक्तशिक्षणार्थम् उपस्थितान् सर्वान् समबोधयत्। कुलसचिव: डॉ. दशरथजादव: पदविकाभ्यासक्रमसम्बन्धितं प्राशासनिकं मार्गदर्शनम् अकरोत्। इन्फिनिटि- इन्फोवे इत्याख्यतन्त्रांशनिर्माणसंस्थया एतदनुगुणं तन्त्रांशं निर्माय कार्यशालायां समुपस्थितेभ्य: प्रतिभागिभ्य: अस्य तन्त्रांशस्य प्रदर्शनमपि कृत्वा विभिन्नप्रतिभागिकृतपृच्छाया: समाधानमपि व्यधायि। अस्यां कार्यशालायां त्रिंशदधिका: संयोजका: भागमग्रहीषु:। कार्यशालाया: सञ्चालनं किञ्च सम्पूर्तौ आभारविधिज्ञापनं परीक्षानियामक: डॉ. योगेशपटेल: अकरोत्। परीक्षाविभागस्य कर्मचारिण: कार्यशालाया: सफलतायै: सम्यग्रूपेण स्वदायित्वं निरवाक्षु।

Report Source: **SOMJYOTI**- University Newsletter

## "अलङ्कारनिर्णय: " इति विषये समायोजिता साहित्यशास्त्रीया कार्यशाला

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन २६-०८-२०१९ त: ३०-०८-२०१९ पर्यन्तं पञ्चदिवसीया साहित्यशास्त्रीया "अलङ्कारनिर्णय: " इति विषये कार्यशाला समायोजिता आसीत्। अस्यां कार्यशालायां विश्वविद्यालयपरिसरच्छात्रै: सह विविधमहाविद्यालयेभ्य: आगता: उपपञ्चविंशति: छात्रा: भागं गृहीतवन्त:। अस्या: कार्यशालाया: उद्घाटनं माननीयकुलपते: प्रो. गोपबन्धुमिश्रवर्यस्य किञ्च कुलसचिवस्य डॉ. दशरथजादवस्य आध्यक्ष्ये सम्पन्नम्। उद्घाटनसमापनकार्यक्रमे विश्वविद्यालयस्य आचार्या:, उपाचार्या: सहायकाचार्या: छात्राश्च सहभागिनोऽभवन्। कार्यशालाया: उद्घाटनसत्रे माननीयकुलपतिना उक्तं यत् यथा अलङ्कारा: शरीरस्य शोभां वर्धयन्ति तथैव साहित्यग्रन्थेषु काव्येष्वपि अलङ्कारा: काव्यचमत्कृतिं जनयन्ति। कार्यशालायामस्यां विभिन्नालङ्कारिकग्रन्थै: उदाहरणपुरस्सरं सरलरीत्या सुबोधरीत्या च अलङ्कारपाठनम् अक्रियत। अस्यां प्रि.डॉ. नरेन्द्रकुमार पण्ड्या, प्रो. अर्चनाकुमारीदुबे, प्रि. डॉ. अमृतलाल भोगायता, डॉ. कलिदासठाकरश्च व्याख्यानानि प्रदत्तवन्त:। अस्या: कार्यशालाया: संयोजनं प्राचार्य: डॉ. नरेन्द्रकुमारपण्ड्या अकरोत्।




अलङ्कारनिर्णय: इति कार्यशालाया: समारोपसमारोहे प्रतिभागिभि: सह प्राध्यापका:

Report Source: **SOMJYOTI**- University Newsletter

## "गोलपरिभाषा" इति विषये समायोजिता ज्योतिषकार्यशाला




श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य वेदवेदाङ्गसङ्कायस्य ज्योतिषविभागेन २१ तः २५ जनवरी २०२० पर्यन्तम् गोलपरिभाषा विषये पञ्चदिवसीया कार्यशाला समायोजिता आसीत्। कार्यशालायामस्यां विश्वविद्यालयपरिसरच्छात्रैः सह विविधमहाविद्यालयेभ्यः आगताः एकोनविंशतिः छात्राः भागं गृहीतवन्तः। अस्याः उद्घाटनं कुलपतेः प्रो.गोपबन्धु-मिश्रस्य आध्यक्ष्ये सम्पन्नम्। उद्घाटनसत्रे मुख्यातिथिः काशीहिन्दूविश्वविद्यालयस्य ज्योतिषविभागाध्यक्षः प्रो. विनयकुमार पाण्डेयः आसीत्।। कार्यशालायामस्यां प्रो. विनयकुमारपाण्डेयस्य मार्गदर्शने काष्टपट्टिकाभिः प्रायोगिकरूपेण गोलयन्त्रस्य निर्माणम् अभवत्। प्रो. श्यामदेवमिश्रेण कार्यशालायां सङ्गणकमाध्यमेन आकाशे ग्रहाणां वास्तविकी स्थितिः छात्रेभ्यः बोधिता। कार्यशालायाः समापनसत्रे मुख्यातिथिः राष्ट्रियसंस्कृतसंस्थान-जयपुरपरिसरस्य ज्योतिषविभागाध्यक्षः प्रो. श्यामदेव मिश्रः आसीत्। कार्यशालायां वक्तृषु – प्रो. विनयकुमार पाण्डेयः, प्रो.श्यामदेव मिश्रः, डॉ. रमेशचन्द्रशुक्लः, श्रीनित्यानन्द ओझा आसन्। कार्यशालायाः संयोजकः डॉ. रमेशचन्द्र शुक्लः तथा च सहसंयोजकः श्रीनित्यानन्द ओझा आसीत्।

Report Source: **SOMJYOTI**- University Newsletter

# Sanskrit Kavi Sammelan (07-02-2016)






संस्कृतकविसम्मेलने उपस्थिताः मञ्चस्थाः कवयः

## संस्कृतकविसम्मेलनम्

अन्ताराष्ट्रियसंस्कृतसङ्गोष्ठ्याः अङ्गतया श्रीसोमनाथसंस्कृतयुनिवर्सिटीवेरावलम् तथा गुजरात- साहित्य- अकादमी- गान्धीनगरम् इत्यनयोः संयुक्तोपक्रमेण स्वस्तिश्रीविक्रमाब्द २०७२ पौषकृष्णचतुर्दश्यां ७-२-२०१६ तमे दिनाङ्के रविवासरे सायं संस्कृतकविसम्मेलनं समायोजितमासीत् । सन्दर्भेऽस्मिन् लब्धप्रतिष्ठिताः संस्कृतविद्वांसः कवयश्च स्वरचितकाव्यप्रस्तुत्या संस्कृतज्ञानां चित्तप्रसादनं रसास्वादं च कारितवन्तः । तत्र निमन्त्रिताः कवयः इत्थम् आसन् - प्रो.रामकरणशर्म, प्रो.कमलेशदत्तत्रिपाठी, प्रो.अम्बालालप्रजापति, प्रो. अभिराजराजेन्द्रमिश्रः, प्रो. मिथिलाप्रसादत्रिपाठी, प्रो.रामलखनपाण्डेयः, प्रो. हर्षदेवमाधवः, डॉ. जयप्रकाशनारायणद्विवेदी, डॉ. नरेन्द्रकुमारपण्ड्या, डॉ. शिवजीउपाध्यायः,. डॉ. अमृतलालभोगायता, डॉ. उमाकान्तचतुर्वेदी, प्रो.रामकुमारशर्म, डॉ. उमारमणझा, प्रो.रमेशकुमारपाण्डेयः, डॉ. शङ्करजीझा, प्रो. देवेन्द्रनाथपाण्डेयः, प्रो.उमाशङ्करशर्म, डॉ. बलदेवानन्दसागरः, श्री भाग्येशझा, प्रो.राजेन्द्रनाणावटी, प्रो.रामसुमेरयादवः च । अस्य कार्यक्रमस्य सञ्चालनं डॉ. नरेन्द्रकुमारपण्डयामहोदयाः कृतवन्तः । अध्यक्षत्वं च ऊढवन्तः श्रीभाग्येशझामहोदयाः । समग्रस्यास्य कार्यक्रमस्य संयोजनं संकलनं च कृतवन्तः प्रो. हर्षदेवमाधवमहोदयाः ।



Report Source: **SOMJYOTI**- University Newsletter




## Sanskrit Slogans on the Walls of Campus




स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम् ।
योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा ॥
निरुक्तम्
अध्यापिता ये गुरुं नाद्रियन्ते विप्रा वाचा मनसा कर्मणा वा ।
यथैव ते न गुरोर्भोजनीयास्तथैव तान्न भुनक्ति श्रुतं तत् ॥
पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥
SAY NO TO
RAGGING
RAGGING IS A PUNISHABLE OFFENCE
DON'T INDULGE IN RAGGING
RAGGING


सकलविद्यास्थानैकायतनं पञ्चदशं काव्यं विद्यास्थानम् ॥

# Office Orders in Sanskrit Language

Shree Somnath Sanskrit University
(Estd. by Government of Gujarat)
Rajendra Bhuvan Road, VERAVAL-362 266
District : Gir Somnath, Gujarat, INDIA
Phone : 02876 - 244531 • Fax : 02876 - 244417

Prof. Ark Nath Chaudhary
Vice - Chancellor

Ref. : સસસયુ/યુવકમહોત્સવ/2386/૨૦૧૫

Date : 20/10/2015

मान्याः
डॉ. अभय दुबे
Assistant Professor,
Department of Music (Indian Classical /Vocal)
Faculty of Performing Arts, The M.S.U. of Baroda

विषयः - युवमहोत्सवे निर्णायकत्वेनोपस्थातुमामन्त्रणम्

महोदयाः

सादरं संसूच्यते यत् श्रीसोमनाथसंस्कृतविश्वविद्यालयः युवमहोत्सवस्य (२०१५-२०१५) २४-१०-२०१५ तः २६-१०-२०१५ दिनाङ्कं यावत् भागवतविद्यापीठे सोलायां (कर्णावत्याम्) आयोजनं करोति। अस्मिन् महोत्सवे विविध शैक्षणिक–क्रीडा-साहित्य-कलास्पर्धाः भविष्यन्ति। तत्र विश्वविद्यालयसंलग्नाः ३६ महाविद्यालयाः एवञ्च विश्वविद्यालयः सोत्साहं भागं ग्रहीष्यन्ति । तेषां छात्राणाम् अध्यापकानाञ्च उत्साहवर्धनाय अस्मिन् युवमहोत्सवे तत्रभवन्तः निर्णायकरूपेण समुपस्थातुं सादरं प्रार्थ्यन्ते। । विश्वविद्यालयद्वारा यातायातव्यवस्था निवासव्यवस्था च करिष्यते ।

સાદર જણાવવાનું કે શ્રી સોમનાથ સંસ્કૃત યુનિવર્સિટી દ્વારા યુવક મહોત્સવ-૨૦૧૫-૧૬ નું તા.૨૪-૧૦-૨૦૧૫ થી ૨૬-૧૦-૨૦૧૫ દરમ્યાન ભાગવત વિદ્યાપીઠ, સોલા, અમદાવાદ ખાતે આયોજન કરવામાં આવેલ છે. આ યુવક મહોત્સવમાં વિવિધ શૈક્ષણિક, રમતગમત, સાહિત્ય અને કળા સ્પર્ધાઓનું આયોજન કરવામાં આવનાર છે. તેમાં યુનિવર્સિટી સાથે સંલગ્ન ૩૬ મહાવિદ્યાલયો અને યુનિવર્સિટી પરિસરના વિદ્યાર્થીઓ ઉત્સાહભેર ભાગ લેશે. સાદર નિવેદન છે કે આ યુવક મહોત્સવમાં આપશ્રી નિર્ણાયક તરીકે ઉપસ્થિત રહી કાર્યક્રમની શોભા વધારવા મહેરબાની કરશોજી. વિશ્વવિદ્યાલય દ્વારા જવા-આવવાનું ભાડું આપવામાં આવશે તથા નિવાસવ્યવસ્થા પણ કરવામાં આવશે.

भवदीयः

(प्रो.अर्कनाथ चौधरी)
कुलपतिः

Phone : (R) 02876-244530, (M) 094266 87450, - 08462830055
Email : vc.sssuni@gmail.com, choudharyarknath@gmail.com

# Shree Somnath Sanskrit University

**(Estd. by Government of Gujarat)**

Rajendra Bhuvan Road, **Veraval - 362 266.** District : Gir -Somnath. (Gujarat)
Ph. : 02876-244532 Fax : 02876-244417, E-mail : sssu.veraval@gmail.com
Website : www.sssu.ac.in


Ref No. ससस्यु/समितिरचना/3984/२०२० Date दि.०८.०९.२०२०

**परिपत्रम् (परिवर्तिम्)**

**विषयः** - वार्षिकप्रवृतीनां सुचारुरूपेणसंकलनाय सञ्चालनाय आयोजनाय च विश्वविद्यालयस्य विभिन्नानां समितीनां संरचनार्थं तथा च पूर्व-समितीनां समयावधिवर्द्धनाय।

**सन्दर्भः** - माननीयकुलपतिवर्याणां प्रस्तुतविषयकसंचिकायां २६.०८.२०२० तमस्य दिनाङ्कस्य निर्देशानुसारम्।

अथ श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य अनुस्नातक-विभागस्य तथा च विश्वविद्यालयसञ्चालितसंस्कृतमहाविद्यालयस्य सर्वेऽपि प्राध्यापकाः, अधिकारिणः कर्मचारिणः च संसूच्यन्ते यत् विश्वविद्यालये नानाविधप्रवृत्तीनां सुचारुरूपेण संकलनाय, संचालनाय आयोजनाय च पूर्वोक्तसन्दर्भानुसारम् अनुमत्या विविधानां समितीनां संरचना कृता वर्तते तद्यथा -

**विभागः - १ : निम्नलिखितसमितीनाम् अवधिः १५.०६.२०२१ दिनाङ्कं यावत् भविष्यति।**

| क्रमः | समितिनाम | अध्यक्षनाम | सभ्यसचिवः | सदस्याः |
|---|---|---|---|---|
| १ | सोमज्योतिसंपादनसमितिः | डॉ. नरेन्द्रकुमारः पण्ड्या | श्री रवीन्द्रः काले | डॉ. ललितः पटेलः,<br>डॉ. जानकीशरण आचार्यः,<br>डॉ. दीपेशः कतिरा<br>श्री जिगरः भट्टः |
| २ | चलचित्रप्रदर्शनसमितिः | डॉ. दीपेशः कतिरा | श्री विपुलः जादवः | डॉ. पङ्कजकुमारः रावलः<br>छात्रप्रतिनिधिः |
| ३ | सङ्गीतसमितिः | प्रॉ.अर्चनाकुमारी दूबे | श्री अपूर्वा अग्रवालः | डॉ. दीपेशः कतिरा<br>छात्रप्रतिनिधयः |
| ४ | वायब्रन्टगुजरातम्/<br>विश्वविद्यालयप्रदर्शनी | श्री रवीन्द्रः काले | डॉ. कार्तिकः पण्ड्या | डॉ. जानकीशरण आचार्यः<br>श्री हरेशः खेरः |
| ५ | छात्रावाससमितिः<br>(बोयज होस्टेल) | डॉ. ललितः पटेलः<br>(अध्यक्षः) | श्री जयदीपसिंहः परमार | डॉ. नरेन्द्रकुमारः पण्ड्या (उपाध्यक्षः)<br>डॉ. दीपेशः कतिरा,<br>डॉ. पङ्कजकुमारः रावलः,<br>श्री जिगरः भट्टः<br>श्री भावसिंहभाई बारड,<br>श्री कमलेशकुमार सगरः<br>श्री परागभाई मारु,<br>गृहपतिः, छात्रप्रतिनिधिः |
| ६ | छात्रावाससमितिः<br>(गर्लस होस्टेल) | डॉ. बी. उमामहेश्वरी | श्री श्वेताबेन जानी | श्री अपूर्वा अग्रवालः<br>कु. दृष्टिबेन बारैया, गृहमाता, छात्रप्रतिनिधिः |
| ७ | विश्वविद्यालयप्रचारसमितिः | डॉ. ललितः पटेलः | श्री विपुलः जादवः | डॉ. महेन्द्रकुमारः दवे,<br>डॉ. शत्रुघ्नः पाणिग्राही, डॉ. दीपेशः कतिरा,<br>डॉ. पङ्कजकुमारः रावलः,<br>डॉ. डी. एम. मोकरीया, श्री जिगरः भट्टः,<br>डॉ. आशाबेन माढकः |

| | | | | |
|---|---|---|---|---|
| ८ | मीडियाप्रचारसमितिः | डॉ. जानकीशरणः आचार्यः | श्री रवीन्द्रः काले | डॉ. कार्तिकः पण्ड्या<br>श्री हरेशः खेरः,<br>श्री विपुलः जादवः |
| ९ | महिलाधिकारसमितिः<br>(Woman Cell) | डॉ. अर्चनाकुमारी दूबे | कु. विदुषी बोल्ला | डॉ. बी. उमामहेश्वरी<br>श्री अपूर्वा अग्रवालः<br>कु. दृष्टिबेन बारैया<br>श्री श्वेताबेन जानी<br>विद्यार्थीप्रतिनिधिः |
| १० | छात्रसमस्यानिवारणसमितिः | डॉ. पङ्कजः रावलः | डॉ. जयेशः मुंगरा | डॉ. बी. उमामहेश्वरी<br>श्री नित्यानन्दः ओझा<br>श्री जिगरः भट्टः<br>गृहपतिः<br>गृहमाता<br>छात्रप्रतिनिधिः |
| ११ | विद्यावारिधेः मौखिकीपरीक्षायाः (वायवा) सङ्कलनम् | डॉ. कार्तिकः पण्ड्या | श्री हितेषभाई जानी | श्री विपुलः जादवः<br>श्री अपूर्वा अग्रवालः |
| १२ | संस्कृतसंवर्धनसमिति: | डॉ. दीपेशः कतिरा | श्री जयदीपसिंह परमार | डॉ. बी. उमामहेश्वरी<br>श्री नित्यानन्दः ओझा<br>डॉ. आशाबेन माढकः<br>श्री जिगरः भट्टः |
| १३ | दिव्यांगसमिति: | डॉ. आशाबेन माढकः | श्री गोपालभाई ठकरार | श्री नित्यानंदः ओझा<br>कु. विदुषी बोल्ला |
| १४ | शोधज्योतिसंपादकसमिति: | डॉ. विनोदकुमारः झा | डॉ. कार्तिकः पण्ड्या | डॉ. नरेन्द्रकुमारः पण्ड्या<br>डॉ. ललितः पटेलः<br>डॉ. शत्रुघ्नः पाणिग्राही<br>डॉ. जानकीशरणः आचार्यः |
| १५ | मेधापत्रिकासमिति: | डॉ. पङ्कजः रावलः | श्री जिगरः भट्टः | श्री नित्यानंदः ओझा, छात्रसदस्याः |
| १७ | वाक्यार्थपरिषद् | डॉ. डी. एम. मोकरीया | श्री अपूर्वा अग्रवालः | कु. विदुषी बोल्ला |

**विभाग: - २ : निम्नलिखित-समितीनां कार्यकाले समाप्ते सति १५.०६.२०२१ दिनाङ्कं यावत् अवधि: विस्तीर्यते । यस्या: समिते: कार्यकाल: १५.०६.२०२० दिनाङ्कात् अनन्तरं समाप्त: भवति तस्या: समिते: कार्यकालावधि: १५.०६.२०२१ दिनाङ्कं यावत् भविष्यति ।**

| क्रमः | समितिनाम | अध्यक्षनाम | सभ्यसचिवः | सदस्याः |
|---|---|---|---|---|
| १ | वाग्वर्धिनी सभा<br>(०१.१२.२०२०) | प्रॉ.विनोदकुमार: झा | डॉ. जानकीशरण आचार्यः | डॉ. शत्रुघ्नः पाणिग्राही |
| २ | शिस्तसमितिः<br>(Discipline Cell)<br>(०१.१२.२०२०) | कुलसचिवश्री | डॉ. जयेशः मुंगरा | प्रॉ.अर्चनाकुमारी दूबे<br>डॉ. नरेन्द्रकुमारः पण्ड्या<br>प्रॉ.देवेन्द्रनाथ पांडेय<br>प्रॉ.महेन्द्रकुमारः दवे<br>डॉ.योगेशकुमार पटेल |

| | | | | |
|---|---|---|---|---|
| ३ | यज्ञयागादिसमितिः (०१.१२.२०२०) | डॉ. शत्रुघ्नः पाणिग्राही | श्री विशालः जोषी | डॉ. पङ्कजकुमारः रावलः<br>डॉ. दीपेशः कतिरा,<br>डॉ. जानकीशरण आचार्यः |
| ४ | सांस्कृतिकसमितिः (०१.१२.२०२०) | डॉ. पङ्कजकुमारः रावलः | डॉ. बी. उमामहेश्वरी | डॉ. जानकीशरणः आचार्यः<br>डॉ.रमेशचन्द्र शुक्ल<br>श्री नित्यानन्दः ओझा<br>डॉ. जयेशः मुंगरा<br>श्री करशन छात्रोडीया (वहीवटी सहायक) |
| ५ | वनवासी-अनुसूचितजनजातिसमितिः (SC/ST Cell) (०१.१२.२०२०) | डॉ. डी. एम. मोकरीया | श्री कमलेशकुमार सगर (कार्यालय अधिक्षक) | डॉ. दीपेशः कतिरा<br>श्री भीमभाई गलचर |
| ६ | एन्टीरैगिंगसमितिः (Anti-Ragging Cell) (११.१०.२०२०) | माननीय कुलपतिश्री | कुलसचिवश्री | प्रो.देवेन्द्रनाथ पांडेयः<br>डॉ. अर्चनाकुमारी दूबे,<br>डॉ. नरेन्द्रकुमारः पण्ड्या |
| ८ | ICC Cell (Internal Complaint Committee (३१.०३.२०२१) | डॉ. ललितः पटेलः (अध्यक्षः) | श्री कमलेशकुमार सगर (कार्यालय अधिक्षक) | डॉ. नरेन्द्रकुमारः पण्ड्या<br>श्री ए.जे.राठवा (मुख्य हिसाबी अधिकारीश्री)<br>डॉ.योगेशकुमार पटेल (परीक्षा नियामकश्री) |
| ७ | तान्त्रिकशिक्षणसमितिः (Information Technology Cell) (२०.०८.२०२१) | श्री हरेशः ए. खेर | श्री करशनः छात्रोडीया | डॉ.जानकीशरण आचार्यः<br>श्री रवीन्द्रः काले |

**सूचनाः**

- **एतदुत्तरदायित्वम् एकस्य वर्षस्य कृते भविष्यति ।**
- **कार्यक्रमस्य अध्यक्षैः/संयोजकैः समये समये यथापेक्षितं आचार्यस्य, अध्यक्षस्य, कुलसचिवस्य, कुलपतेः वा मार्गदर्शनं प्राप्य उपवेशनं च कृत्वा कार्यक्रमस्य सूक्ष्मम् आयोजनं पूर्वमेव करणीयम् ।**
